# अभ्यास-प्रश्नपत्रम् - 2021-22

## द्वितीयं सत्रम्

## कक्षा - एकादशी

### संस्कृतम् (केन्द्रिकम्) (कोड–322)

**समयः -होराद्वयम्** **सम्पूर्णाङ्काः- 40**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 प्रमुखाः प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
4. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यम् एव लेखनीया।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**वर्णनात्मकाः प्रश्नाः** **40 अङ्काः**

| | | |
|---|---|---|
| | **अपठितावबोधनम्** | |
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>एकत्वभावनया यत् कार्यं क्रियते तद् "एकता" इति कथ्यते। एकतया मानवः बलवान् भवति। एकतया समाजः, राष्ट्रं, जगत् च उन्नतिपथम् आरोहति। अद्यत्वे तु संसारे एकतायाः अतीव आवश्यकता वर्तते। यस्मिन् देशे एकतायाः अभावो भवति सः देशः स्वकीयां स्वतन्त्रतां रक्षितुं नैव शक्नोति। अस्माकं देशः अपि एकतायाः अभावात् चिरकालपर्यन्तं परतन्त्रः आसीत्, परम् यदा भारते एकत्वभावना समुत्पन्ना तदा भारतं स्वातन्त्र्यम् अलभत। एकतायाः प्रभावः जडवस्तुषु अपि दृश्यते। जलबिन्दवः सम्मेल्य नदीरूपं धारयन्ति। क्षुद्रजन्तवः अपि मिलित्वा यदा रज्जुरूपं धारयन्ति तदा ते बलशालिनं गजम् अपि नियन्त्रयितुं समर्थाः भवन्ति। यदा अस्माकं मनांसि, गमनं, भाषणं, संकल्पश्च एकत्वभावनया परिपूर्णाः भवन्ति, तदा न किमपि असाध्यं भवति, अत एवोक्तम् -एकतायां एव बलं भवति। | 10 |

| | | |
|---|---|---|
| | **(अ) एकपदेन लिखत– (केवलं प्रश्नचतुष्टयम्)**<br>i. एकतया क: बलवान् भवति?<br>ii. जलबिन्दव: सम्मेल्य किं रूपम् धारयन्ति?<br>iii. कया समाज:, राष्ट्रं, जगत् च उन्नतिपथं आरोहति?<br>iv. एकताया: अभावे देश: कां रक्षितुं न शक्नोति?<br>v. कस्या: प्रभाव: जडवस्तुषु अपि दृश्यते?<br>**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. भारतम् कदा स्वातन्त्र्यम् अलभत?<br>ii. कदा किमपि असाध्यं न भवति?<br>iii. क्षुद्रजन्तव: मिलित्वा किं कर्तुं समर्था: भवन्ति?<br>**(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत–**<br>**(ई) यथानिर्देशम् उत्तरत– (केवलं प्रश्नत्रयम्)**<br>i. 'अवनति:' पदस्य विपर्ययपदं अनुच्छेदात् चित्वा लिखत।<br>ii. 'देश: परतन्त्र:' इत्यनयो: पदयो: विशेष्यपदं किम् अस्ति?<br>iii. 'क्षुद्रजन्तव: अपि मिलित्वा रज्जुरूपम् धारयन्ति' अस्मिन् वाक्ये क्रियापदं किम्?<br>iv. स: देश: स्वकीयाम् स्वतन्त्रताम् रक्षितुं नैव शक्नोति अत्र 'स:' इति सर्वनामपदं कस्मै प्रयुक्तम्? | ½ x4=2<br><br><br><br><br><br>2X2=4<br><br><br><br><br>1X1=1<br><br>1X3=3 |
| | | |
| | **रचनात्मकं कार्यम्** **15 अङ्का:** | |
| **2.** | **अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत-**<br>भवती सौम्या। भवत्या: वर्गेण अनाथबालकै: सह प्रतियोगितायां पराजय: अनुभूत:। आत्मानुभवान् वर्णयन्त्या भवत्या मातरं प्रति लिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुन: लेखनीयम्।<br><br>सरोजिनी छात्रावास:<br>(i)--------------- | |

| | | |
|---|---|---|
| | पूज्या मातृचरणाः!<br>सादरं (ii) -------------- ।<br>अत्र खलु सर्वं कुशलम्। मन्ये तत्रापि सर्वे (iii)------------------स्युः। मात! अस्माकं विद्यालयस्य समीपे एकः अन्यः विद्यालयः अस्ति यत्र दीना (iv)------------- छात्राः एव पठन्ति। अस्माकं (v)-----------तस्य विद्यालयस्य दशमकक्षायाः छात्रैः (vi) ---------------गीता-अन्त्याक्षरी - प्रतियोगिताम्  (vii)-------------- । जानाति भवती, वयं सर्वे तस्याम् (viii)---------------- जाताः। तेषां प्रदर्शनं तु अभूतपूर्वम् आसीत्। नूनम् अस्माकं दर्पः सर्वथा (ix)-------------- श्रमः सर्वत्र विजयते  खलु।<br>भवत्याः पुत्री<br>(x)------------------<br>**मञ्जूषा**<br>कुशलिनः, पराजिताः, नष्टः, सौम्या, देहलीतः, सह, असहायाः, आयोजितवान्, प्राचार्यः, चरणस्पर्शः | |
| 3. | **मञ्जूषाप्रदत्तशब्दानां सहायतया कथायाः पूर्तिम् कुरुत।**<br>सुदामा (i) ---------------मित्रम् आसीत्। सः सर्वप्रथमं  (ii)------------- श्रीकृष्णेन सह (iii)-------------। एतौ मिलित्वा गुरोः समीपम् एकादश (iv)-----------अपठताम्। कालक्रमेण वासुदेवः द्वारिकायाः नृपः अभवत्। सुदामा तु (v)------------ एव आसीत्। सः श्रीकृष्णदर्शनाय (vi)-------------अगच्छत्। द्वाररक्षकाः तं राजसभां अनयन्। बाल्यबन्धु वासुदेवः तस्य (vii)---------------------अकरोत्। श्रीकृष्णः (viii) --------------भार्यया प्रदत्तान् तण्डुलान् अखादत्। (ix)-------------- निवारणाय श्रीकृष्णः तस्मै (x)----------------- अयच्छत्।<br>**मञ्जूषा**<br>ऐश्वर्यं, आलिंगनं, सुदाम्नः, दरिद्रः, अमिलत्, द्वारिकां, श्रीकृष्णस्य, वर्षाणि, गुरुकुले, दारिद्र्यस्य,<br>**अथवा** | ½x10=5 |

| | | |
|---|---|---|
| | **अधोलिखित–संवादम् मञ्जूषायाः उचितानि वाक्यानि चित्वा पूरयत उत्तरपुस्तिकायां च लिखत-**<br>देवेश : ---- ऋषि! भवान् कुत्र वसति ?<br>ऋषि : (i) ................................<br>देवेश : ----दिल्लीनगरे भवान् कदा आगच्छत् ?<br>ऋषि : (ii) ..............................।<br>देवेश : ..... मणिपुरं त्यक्त्वा भवान् कथं आगतवान् ?<br>ऋषि : (iii) .....................।<br>देवेश : ---किं मणिपुरे उच्चशिक्षायाः व्यवस्था नास्ति।<br>ऋषि : (iv) ...................................।<br>देवेश : --- अस्तु ,कल्याणकारिणी भवतु दिल्ली तव कृते।<br>ऋषि : (v) .........................................। | |
| 4. | **'वृक्षाः अस्माकं मित्राणि'** इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत।<br>(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम्।)<br>**मञ्जूषा**<br>वृक्षाः, जलम्, छाया, फलानि पुष्पाणि, काष्ठानि, यच्छन्ति, भूमि-संरक्षणम्, कुर्वन्ति, सत्पुरुषाः इव, पर्यावरणम्, रक्षन्ति<br>**अथवा**<br>**अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं पञ्चवाक्यम्)**<br>i. राम पाठ पढता है।<br>ii. छात्र शिक्षक के साथ जायेंगे।<br>iii. देवेश छात्रों में श्रेष्ठ हैं।<br>iv. पक्षी वृक्षों पर कूजते हैं।<br>v. हम सब मन्दिर जाते हैं।<br>vi. पशु घर से बाहर जाते हैं। | 1x5=5 |

| | | |
|---|---|---|
| | **पठितावबोधनम्** | 15 |
| **5.** | . तत् रात्रौ ग्राम्यजनानां नेत्रयोः निद्रा नास्ति। ते प्रातरागत्य तटवर्तिवृक्षाणां छेदनम् कृतवन्तः। बन्धच्छेदम् कृत्वा जलं च बहिः कृतवन्तः। एवम् प्रकारेण कतिपय– दिनानि व्यतीतानि। ततः पङ्कोद्धारं कृत्वा पुष्करिणीम् गभीराम् कृतवन्तः। पङ्कं च आनीय शस्यक्षत्रे प्रसारितवन्तः - इत्थं निदाघकालः उपगतः। सहसा वृष्टिरभवत्। पुष्करिणी च पूर्णा संजाता। निर्मलं जलं दृष्ट्वा सर्वे प्रसन्ना अभवन्। तटानाम् परिष्करणेन सर्वत्र सौविध्यं अनुभूतम्।<br>(अ) **एकपदेन उत्तरत - { केवलं प्रश्नद्वयम् }**<br>i. केषां नेत्रयोः निद्रा नास्ति?<br>ii. प्रातः जनाः केषां छेदनम् कृतवन्तः?<br>iii. जनाः पङ्कम् कुत्र प्रसारितवन्तः?<br>(आ) **पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नैकम् )**<br>i. किं दृष्ट्वा सर्वे प्रसन्नाः अभवन्?<br>ii. कदा सर्वत्र सौविध्यं अनुभूतम्? | 3<br>½ x2=1<br>2x1=2 |
| | | |
| **6.** | **अधोलिखितं पद्यं पठित्वा तदाधारित-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।<br>अव्यक्ता हि गतिर्दुखं देहवद्भिरवाप्यते।<br>ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।<br>अनन्येनैव योगेन मां ध्यायन्त उपासते।<br>(अ) **एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>i. कैः दुखम् अवाप्यते?<br>ii. केन जनाः मां ध्यायन्ते?<br>iii. कानि सर्वाणि मयि संन्यस्य मत्पराः भवन्तु?<br>(आ) **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्)**<br>i. केषाम् अधिकतरः क्लेशः अस्ति? | 3<br>½ x2=1<br>2x1=2 |

| | | |
|---|---|---|
| | ii. ये तु सर्वाणि कर्माणि कुत्र संन्यस्य केन मां ध्यायन्त उपासते? | |
| 7. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन लिखत–**<br><br>दौवारिक: -- { प्रविश्य } जयतु जयतु देव: ।<br>गौरंग: - दौवारिक ! सत्वरं त्रिचतुरान्स्तन्तुवायान् समानय।<br>दौवारिक: - यद् देव आज्ञापयति। { बहिर्गत्वा त्रीन् तन्तुवायान् समानीय प्रविशति }<br>गौरांग: - { तन्तुवायान् उद्दिश्य } भो भो ! यूयम् निर्मितान् पटान् मह्यं दत्त।<br>तन्तुवाया: - न वयमयोग्यमूल्यत्वात् पटं निर्मामः।<br>गौरांग - { अस्तु शोभनं पटं निर्माय मह्यं दत्त, योग्यं मूल्यम् भविष्यति। गृहाण इमा: मुद्रा: (इति पंचदशमुद्रा ददाति, ते न गृह्णन्ति, हठात् तेषां वसने निबध्य गलहस्तेन निष्कासयति)।<br>तन्तुवाया:--(द्वारिस्थिता:) महाराज! न वयं शतमूल्यम् पटं पञ्चदशभिरेव मुद्राभिर्निर्मास्याम:।<br><br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. सत्वरं कान् समानय?<br>ii. क: जयतु?<br>iii. त्वया निर्मितं कं मह्यं दत्त?<br>iv. कान् समानय?<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नैकम्)**<br>i. वयं तन्तुवाया: किमर्थं पटं न निर्मामः?<br>ii. दौवारिक: बहिर्गत्वा किं करोति? | 3<br><br>½ x2=1<br><br>2x1=2 |
| 8. | **अधोलिखितस्य पद्यस्य भावार्थं मजूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत–**<br><br>**तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित्।**<br>**अनिकेत: स्थिरमतिर्भक्तिमान्मे प्रियो नर:।।**<br><br>**भावार्थ:** - य: नर: निन्दायां स्तुतौ च समभावम् धारयति, य: मानव: (i)............, येन केनचित् प्रकारेण (ii) ............., निवासस्थाने अनासक्त:, (iii)..............., ईश्वरस्य भक्तिभावेन युक्तोऽस्ति स: (iv) ......... श्रीकृष्णस्य प्रिय: भवति।<br><br>**मञ्जूषा** | ½x4=2 |

<table>
<tr><td></td><td>मानवः, स्थिरबुद्धिः, संतुष्टः, मननशील :<br><br>अथवा<br><br>प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत –<br><br>(अ) सर्वकर्मफ़लत्यागम् ततः कुरु यतात्मवान्।<br>i. सर्वाणि कर्माणि त्यक्त्वा आत्मवान् भव।<br>ii. मनसः इन्द्रियाणाञ्च नियन्त्रणं कृत्वा सर्वकर्मणां फलस्य इच्छायाः त्यागं कुरु।<br>iii. आत्मवान्जनः कर्म न करोति।<br><br>(आ) महाराजस्य बहु संतोषोऽभवत्।<br>i. महाराजः संतुष्टः नाभवत्।<br>ii. राज्ञः अतीव संतुष्टिः अभवत्।<br>iii. राजा दुखं प्राप्तवान्।</td><td>1x2=2</td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>9.</td><td>अधोलिखित- अन्वये रिक्तस्थानानि पूरयत -<br><br>तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।<br>भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥<br><br>अन्वयः - पार्थ! अहं (i)--------------- मयि (ii)--------------- न चिरात् (iii) -------------- समुद्धर्ता (iv) -------------।<br><br>मञ्जूषा<br><br>भवामि, आवेशितचेतसाम्, तेषाम्, मृत्युसंसारसागरात्</td><td>½x4=2</td></tr>
<tr><td></td><td></td><td></td></tr>
</table>

| 10. | 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत-<br><br>**'क' स्तम्भः**      **'ख' स्तम्भः**<br>(i) ततः पङ्कोद्धारम् कृत्वा    क ) सर्वे प्रसन्नाः अभवन्<br>(ii) निर्मलं जलं दृष्ट्वा    ख) मद्भक्तः सः मे प्रियः<br>(iii) सर्वारम्भपरित्यागी यो    ग) प्रमाणपत्रम् `<br>(iv) पश्यराजमुद्राङ्कितं    घ) पुष्करिणीम् गभीराम् कृतवन्तः | ½x4=2 |
|---|---|---|